

ॐ नमः शिवाय

# रुद्राष्टाध्यायी

लेखक-सुरेश शर्मा ( त्राम्बली )
सम्पर्क : ९८१६६-६६३०३

# रुद्राष्टाध्यायी







लेखक-सुरेश शर्मा ( त्राम्बली ) ९८१६६-६६३०३

# अथ रुद्रः षड् न्यास

श्रीगणेशाय नमः॥ आचम्य प्राणानायम्य। देशकालौ संकीर्त्य च। अद्य पूर्वोच्चारितैव गुणविशेषण विशिष्टियां शुभपुण्यतिथौ ममाऽऽत्मनः श्रुतिस्मृतिपुराणोक्तफल प्राप्त्यर्थे धर्मार्थकाममोक्ष सिद्धि द्वारा सर्वव्याधि निरासन पूर्वकं सर्वाभीष्ट सिद्ध्यर्थे श्रीभवानीशङ्कर देवता प्रीत्यर्थे च रुद्रैकादशिन्यऽभिषेक युक्तं वा अमुकद्रव्येण रुद्राभिषेकऽमहं करिष्ये। तदङ्गतया विहितान् शरीर शुद्ध्यर्थं लघुषडङ्ग न्याससाँश्चकरिष्ये॥

मनोजूतिरितिमन्त्रस्य बृहस्पतिर्ऋषिः बृहती छन्दः बृहस्पति देवता हृदय न्यासे जपे विनियोगः।

**ॐ मनोजूतिज्ज्जुषताता माज्जस्य बृहस्प्पतिर्यज्ञमिम न्तनोत्वरिष्टंयज्ञ ꣳ समिमन्दंधातु। व्विश्वेदेवासऽइह मादयन्तामो ꣳ३ प्रतिष्ठ॥ हृदयायनमः॥१॥**

अबोध्यग्निरितिमंत्रस्य बुधगविष्ठिरा ऋषिः त्रिष्टुप् छन्दः अग्निर्देवता शिरोन्यासे जपे विनियोगः॥

**अबोध्यग्निः समिधा जनानाम् प्रतिधेनुमिवायती मुषा सम्। यह्वा ऽइवप्प्रवयामुज्जिहाना ꣳप्प्रभानवः सिस्त्रतेनाक मच्छ॥ शिरसे स्वाहा॥२॥**

ॐ मूर्धानमितिमन्त्रस्य भरद्वाजऋषि: त्रिष्टुप् छन्द:। अग्निर्देवता। शिखान्यासे जपे विनियोग:॥

**मूर्द्धा नन्दिवो ऽअरतिपृथिव्व्या व्वैश्वानरमृतऽआजातमग्निम्। कवि ᳪसम्म्राज मतिथिञ्जनानामा सन्नापात्रञ्जनयन्त देवा:॥ शिखायै वषट्॥३॥**

मर्म्माणित इतिमन्त्रस्य अप्रतिरथ ऋषि: विराट् छन्द: मर्म्माणिदेवता कवचन्यासे जपे विनियोग:॥

**मर्म्माणि तेव्वर्म्मणाच्छादयामि सोमस्त्वारा जामृते नानुव-स्ताम्॥ उरोर्व्वरीयोव्वरुणस्तेकृणोतु जयन्तन्त्वानुदेवा मदन्तु॥ ॐ कवचाय हुं॥४॥**

विश्वतश्चक्षुरुतमन्त्रस्य विश्वकर्मा भौवन ऋषिः त्रिष्टुप् छन्दः विश्वकर्मा देवता नेत्रन्यासे जपे विनियोगः ॥

**ॐ विश्वतश्चक्षुरुतव्विश्वतोमुखोव्विश्वतोबाहुरुत व्विश्व-तस्पात्। सम्बाहुब्भ्यान्धमति सम्पतत्रैद्यावा भूमी जनयन्देव एकः ॥ ॐ नेत्रत्रयाय वौषट् ॥५ ॥**

मानस्तोक इति मन्त्रस्य परमेष्ठी ऋषिः जगती छन्दः एकरुद्रो देवता अस्त्र न्यासे जपे विनियोगः ॥

**ॐमानस्तोकेतनये मानऽआयुषि मा नो गोषु मानोऽअश्वेषु रीरिषः। मानोव्वीरान्नुद्द्र भामिनोवधीर्ह्विष्मन्तः सदमित्त्वा हवामहे ॥ अस्त्राय फट् ॥६ ॥ इति लघु षडङ्गन्यासः ॥**

# अथ ध्यानम्

ध्यायेन्नित्यं महेशं रजत गिरिनिभं चारू चन्द्रावतंसं,
रत्ना कल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणै र्व्याघ्रकृत्तिं वसानं,
विश्वापाद्यं विश्ववन्द्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्राम्॥

अथ रुद्राऽष्टाऽध्यायी पाठः

# अथ प्रथमोऽध्यायः

हरिः ओऽम् गणानां त्वा गणपति ঁ हवामहे प्रियाणां त्वा प्रिय पति ঁ हवामहे निधीनां त्वा निधिपति ঁ हवामहे वसोमम। आहमजानि गर्भधमात्वमजासि गर्भधम् ॥ १ ॥

गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह। बृहत्युष्णिहा ककु-प्सूचीभिः शम्यन्तु त्त्वा ॥ २ ॥

द्विपदायाश्चतुष्पदास्त्रिपदायाश्चषट्पदाः। विच्छन्दायाश्च सच्छन्दाः सूचीभिः शँम्यन्तु त्वा ॥ ३ ॥

सहस्तोमाः सहच्छन्दसऽआवृतः सह प्रमा ऋषयः सप्त दैव्याः
पूर्वेषां पन्थामनुदृश्य धीराऽअन्वालेभिरे रथ्यो न रश्मीन् ॥४॥

ओम् यज्जाग्रतो दूरमुदैतिदैवं तदुसुप्तस्य तथैवैति ।
दुरङ्गमञ्ज्योतिषां ज्योतिरेकं तन्मे मनः शिव सङ्कल्पमस्तु ॥५॥

येनकर्माण्यपसो मनीषिणो यज्ञेकृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिव सङ्कल्पमस्तु ॥६॥

यत्प्रज्ञानमुतचेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्नऋते किञ्चनकर्मक्रियते तन्मे मनः शिव सङ्कल्पमस्तु ॥७॥

येनेदं भूतं भुवनं भविष्यत्परिगृहीतमऽमृतेन सर्वम्। येन यज्ञस्तायते सप्तहोता तन्मे मनः शिव सङ्कल्पमस्तु ॥८ ॥

यस्मिन्नृचः सामयजूꣳषि यस्मिन्प्रतिष्ठिता रथना भाविवाराः यस्मिँश्चित्तꣳ सर्वमोतं प्रजानां तन्मे मनः शिव सङ्कल्पमस्तु ॥९ ॥

सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव। हृत्प्रतिष्ठंयदजिरं जविष्ठं तन्मे मनः शिव सङ्कल्पमस्तु ॥१० ॥

## अथ द्वितीयोऽध्यायः

ॐ सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात्। स भूमिꣳ सर्वत स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ॥१ ॥

पुरुष एवेद ꣳ सर्वं यद्भूतं यच्च भाव्यम्। उतामृतत्व स्येशानो यदन्नेनानातिरोहति ॥ २ ॥

एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥

त्रिपादूर्ध्व उतैत्पुरुषः पादोऽस्येहाभवत् पुनः। ततो विष्वङ् व्याक्रामत्साशनानशने अभि ॥ ४ ॥

ततो विराडजायत विराजो अधि पूरुषः। स जातो अत्यरिच्यत् पश्चाद्भूमिमथो पुरः ॥ ५ ॥

तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम्। पशूँस्ताँश्चक्रे

वायव्यानारण्या ग्राम्याश्च ये ॥६ ॥

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे । छन्दा ॐ सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥७ ॥

तस्मादश्वा अजायन्त ये के चोभयादतः। गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥८ ॥

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः। तेन देवा अयजन्त साध्या ऋषयश्च ये ॥९ ॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्। मुखं किमस्यासीत् किं बाहू किमरू पादा उच्येते ॥१० ॥

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्या ँ शूद्रो अजायत॥११॥

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥१२॥

नाभ्या आसीदन्तरिक्ष ँ शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन्॥१३॥

यत्पुषेण हविषा देवा यज्ञमतन्वत। वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः॥१४॥

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञं

तन्वाना अबध्नन् पुरुषं पशुम् ॥ १५ ॥

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह
नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥

अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः सम वर्त्तताग्रे।
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्त्यस्य देवत्त्व माजानमग्रे ॥ १७ ॥

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। तमेव
विदित्वाति मृत्त्युमेति नान्यः पन्था विद्यते यनाय ॥ १८ ॥

प्रजापतिश्चरति गर्भेऽअन्तरजायमानो बहुधा विजायते। तस्य
योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्त्थुर्भुवनानि विश्वा ॥ १९ ॥

योदेवेभ्यऽआतपतियो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥२०॥

रुचं ब्राह्मञ्जनयन्तो देवाऽअग्रेतदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवाऽअसन्वशे ॥२१॥

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुंमऽइषाण सर्वलोकं मऽइषाण ॥२२॥

## अथ तृतीयोऽध्यायः

हरिः ॐ आशु शिशानो वृषभोन भीमो घनाघनः क्षोभण-श्चर्षणीनाम्। सङ्क्रन्दनो निमिष एकवीरः शतꣳ सेनाऽजयत्साक

मिन्द्रः ॥१॥

सङ्क्रन्दनो सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना । तदिन्द्रेणजयत तत्सहध्वं युधो नर ऽइषुहस्तेन वृष्णा ॥२॥

सऽइषुहस्तैः सनिषङ्गिभिर्वशी स ꣳ स्त्रष्टा सयुधऽइंद्रो गणेन । स ꣳ सृष्टजित् सोमपा बाहु शर्द्ध्युग्रधन्वा प्रतिहिता भिरस्ता ॥३॥

बृहस्पते परिदीया रथेन रक्षोहा मित्राँ२ अपबाधमानः । प्रभञ्जन्त्सेनाः प्रमृणो युधा द्यजयन्नस्माक मेद्ध्यविता रथानाम् ॥४॥

बल विज्ञाय स्त्थविरः प्रवीरः सहस्वान् वाजी सहमानऽउग्रः ।

अभिवीरोऽअभि सत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् ॥५ ॥

गोत्रभिदङ्गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा । इम ॐ सजाता अनुवीरयद्ध्वमिन्द्र ॐ सखायोऽनु स ॐ रभद्ध्वम् ॥६ ॥

अभिगोत्राणि सहसा गाहमानोदयोवीरः शतमन्युरिन्द्रः । दुश्च्यवनः पृतनाषाड युध्योऽस्माक ॐ सेना अवतु प्रयुत्सु ॥७ ॥

इंद्र आसान्ने ता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः । देव सेनानामभिभञ्जतीनां जयन्तीनां मरुतोयन्त्वग्रम् ॥८ ॥

इंद्रस्य वृष्णो वरुणस्य राज्ञऽआदित्यानां मरुता शर्द्धउग्रम् । महा मनसांभुवनच्यवानां घोषो देवा नाञ्जयता मुदस्थात् ॥ ९ ॥

उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानांमनꣳसि।
उद्वृत्रहन् वाजिनां वाजिनान्युद्र थानान्जयतांँ यन्तुघोषाः ॥ १० ॥

अस्माकमिन्द्रः समृतेषुदध्वजेष्वस्माकं याऽइषवस्ता जयन्तु।
अस्माकंवीराउत्तरेऽ भवन्त्वस्मांँ२ देवा अवता हवेषु ॥ ११ ॥

अमीषाञ्चित्तं प्रति लोभयन्ती गृहाणाङ्गान्यप्वेपरेहि। अभिप्रेहि
निर्दहहृत्सु शोकैरन्धेनामित्रा स्तमसा सचन्ताम् ॥ १२ ॥

अवसृष्टा परापत शरव्ये। ब्रह्मसꣳशिते। गच्छामित्रा
न्प्रपद्यस्व मामीषाङ्कञ्चनो च्छिषः ॥ १३ ॥

प्रेता जयता न इंद्रो वः शर्मयच्छतु। उग्रावः सन्तु बाहवो

नाधृष्या यथासथ ॥ १४ ॥

असौ यासेनामरुतः परेषामभ्यैति नऽओजसा स्पर्द्धमाना। तां गूहत तमसाप व्रतेन यथामीऽअन्यो ऽअन्यन्न जानन् ॥ १५ ॥

यत्र बाणाः संपतन्ति कुमारा विशिखाऽइव। तत्र इंद्रो बृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥ १६ ॥

मर्म्मांणि ते वर्मणाच्छादयामि सोमस्त्वा राजामृतेनानु वस्ताम्। उरोर्वरीयो वरुणस्ते कृणोतु जयन्तंत्वानु देवा मदन्तु ॥ १७ ॥

## चतुर्थोऽध्यायः

हरिः ओम् विभ्राड् बृहत्पिबतु सौम्यं मद्धवायुर्दधद्यज्ञ

पतावविह्रुतम्। वातजूतोयोऽ अभिरक्षतित्क्मना प्रजाः पुपोष पुरुधा विराजति ॥ १ ॥

उदुत्त्यञ्ञातवेदसन्देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् ॥ २ ॥

येना पावक चक्षसा भुरण्यन्तं जनाँ२अनु। त्वं वरुण पश्यसि ॥ ३ ॥

दैव्यावद्ध्वर्यूऽआगत ꣳ रथेन सूर्यत्वचा। मद्ध्वा यज्ञ ꣳ समञ्ञजाथे तंप्रत्क्नथा ऽयंवेन श्चित्रं देवानाम् ॥ ४ ॥

तं प्रत्क्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषद ꣳ स्वर्विदम्। प्रतीचीनं वृजनं दोहसे धुनिमाशुं जयन्तमनु यासु वर्द्धसे ॥ ५ ॥

अयं वेनश्चोदयत्पृश्निगर्भा ज्ज्योतिर्जरायू रजसो विमाने। इमम
ꣳपा संगमे सूर्यस्य शिशुन्न विप्रा मतिभी रिहन्ति ॥६ ॥

चित्रन्देवानामुदगादनीक ञ्चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्रा
द्यावापृथिवीऽअन्तरिक्ष ꣳसूर्य आत्मा जगतस्तस्थुषश्च ॥७ ॥

आ न इडाभिर्विदथे सुशस्ति विश्वानरः सविता देवी एतौ । अपि
यथा युवानो मत्सथानो विश्वञ्जगदभिपित्वे मनीषा ॥८ ॥

यदद्यकच्च वृत्रहन्नु दगाऽअभि सूर्य। सर्वन्तदिन्द्र ते वशे ॥९ ॥

तरणि विश्वदर्शतो ज्योतिष्कृदसि सूर्य्य। विश्वमाभा
सिरोचनम् ॥१० ॥

तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्त्तोर्विततꣳ सञ्जभार।
यदेदयुक्त हरित: सधस्थादाद्रात्री वासस्तनुतेसिमस्मै ॥१ १ ॥

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे।
अनन्तमन्यद्रुशदस्य पाज: कृष्णमन्यद्धरित: संभरन्ति ॥१ २ ॥

बणमहाँ २ असि सूर्य बडादित्य महाँ २ असि। महस्ते सतो
महिमा पनस्यतेऽद्धा देवमहाँ २ असि ॥१ ३ ॥

बट् सूर्य श्रवसा महाँ२ असि सत्रा देव महाँ २ असि। मह्ना
देवानामसुर्य्य: पुरोहितो विभु ज्योतिरदाभ्यम् ॥१ ४ ॥

श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत। वसूनि जाते जनमान

ओजसा प्रतिभागन्न दीधिम ॥ १५ ॥

अद्या देवाऽउदिता सूर्यस्य निरःहसः पिपृता निरवद्यात्। तन्नो मित्रो वरुणो मामहन्तामदितिः सिंधुः पृथिवी उत द्यौः ॥ १६ ॥

आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ १७ ॥

## अथ पंचमोऽध्यायः

हरि ओऽम् नमस्ते रुद्र मन्यव उतो तऽइषवे नमः बाहुभ्यामुत ते नमः ॥ १ ॥

याते रुद्र शिवा तनूरघोराऽपापकाशिनी। तयानस्तन्वा

शन्तमया गिरिशन्ताभि चाकशीहि ॥ २ ॥

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे । शिवाङ्गिरित्रतां कुरु माहि

ꣳ सीः पुरुषं जगत् ॥ ३ ॥

शिवेन वचसा त्वा गिरिशाच्छा वदामसि यथा नः

सर्वमिज्जगदयक्ष्म ꣳ सुमनाऽअसत् ॥ ४ ॥

अद्ध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। अहींश्च सर्वाञ्ज-

म्भयन्त्सर्वांश्च यातुधान्योऽधराचीः परासुव: ॥ ५ ॥

असौ यस्ताम्रोऽअरुण उत बभ्रुः सुमङ्गलः। ये चैन ꣳ रुद्रा

ऽअभितो दिक्षुश्रिताः सहस्त्र शोऽवैषा ꣳ हेडऽईमहे ॥ ६ ॥

असौ योऽवसर्पति नीलग्रीवो विलोहितः। उतैनङ्गोपा ऽअदृश्रन्नदृश्रन्नुदहार्यः स दृष्टो मृडयाति नः ॥७॥

नमोऽस्तु नीलग्रीवाय सहस्राक्षायमीढुषे। अथो ये ऽअस्य सत्त्वानोऽहन्तेभ्योऽकरन्नमः ॥८॥

प्रमुञ्चधन्वनस्त्वमुभयोरात्क्न्योर्ज्याम्। याश्च ते हस्त ऽइषवः पराता भगवो वप ॥९॥

विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ२ उत। अनेशन्नस्य याऽइषव ऽआभुरस्य निषङ्गधिः ॥१०॥

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयास्मा न्विश्व

तस्त्वमयक्ष्मया परिभुज ॥ ११ ॥

परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः। अथो य ऽइषुधिस्तवारे ऽअस्मन्निधेहि तम् ॥ १२ ॥

अवतत्त्य धनुष्ट्व ꣳ सहस्राक्ष शतेषुधे। निशीर्य्य शल्यानां मुखा शिवो नः सुमना भव ॥ १३ ॥

नमस्ते ऽआयुधायानाततायधृष्णवे। उभाभ्या मुत ते नमो बाहुभ्यां तवधन्वने ॥ १४ ॥

मा नो महान्तमुत मा नोऽअर्भकं मानऽउक्षन्तमुत मान उक्षितम्। मा नो वधीः पितरं मोत मातरं मानः प्रियास्तन्वो रुद्ररीरिषः ॥ १५ ॥

मानास्तोके तनये मानऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः। मा नो वीरान् रुद्रभामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे॥१६॥

नमोहिरणय बाहवे सेनान्न्ये दिशाञ्च पतये नमो नमो। वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः। शष्पिञ्जराय त्त्विषीमते पथीनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो बभ्लुशाय॥१७॥

नमो बभ्लुशाय व्याधिनेऽन्नानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रा याततायिने क्षेत्राणां पतये नमो नमः

सूतायाहन्त्यै वनानां पतये नमो नमो रोहिताय ॥१८॥

नमो रोहितायस्थ पतये वृक्षाणं पतये नमो नमो भुवन्तये वारिवस्कृतायौषधीनां पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणां पतये नमो नमऽउच्चैर्घोषा याक्रन्दयते पत्तीनां पतये नमो नमः कृत्स्नायाया ॥१९॥

नमः कृत्स्नायतया धावते सत्त्वानां पतये नमो नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभायस्तेना नाम्पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमो वञ्चते ॥२०॥

नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गिणऽइषुधिमते तस्कराणां पतये नमो नमः सृकायिभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानां पतये नमः ॥२१॥

नमऽउष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नमऽइषुमद्भ्यो धन्वायिभ्यश्च वो नमो नमऽ आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नमऽआयच्छद्भ्योऽस्यद्भ्यश्च वो नमो नमो विसृजद्भ्यः ॥२२॥

नमो विसृजद्भ्यो विद्ध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो

जाग्रद्भ्यश्च वो नमो नमः शयानेभ्यऽआसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्योधावद्भ्यश्च वो नमो नमः सभाभ्यः ॥२३॥

नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो ऽश्वेभ्यो ऽश्वपतिभ्यश्च वो नमो नमऽआव्याधिनीभ्यो विविद्ध्यन्तीभ्यश्च वो नमो नमऽउगणाभ्यस्तृꣳहतीभ्यश्च वो नमो नमो गणेभ्यः ॥२४॥

नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमः सेनाभ्यः ॥२५॥

नमः सेनाभ्यः सेनानी भयश्च वो नमो नमो रथिभ्यो ऽअरथेभ्यश्च

वो नमो नमः क्षत्तृभ्य संगृहीतृभ्यश्च वो नमो नमो महद्भ्यो ऽअर्भकेभ्यश्च वो नमः ॥ २६ ॥

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमो नमः श्वभ्यः ॥ २७ ॥

नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नील ग्रीवाय च शितिकण्ठाय च नमः कपर्द्दिने ॥ २८ ॥

नमः कपर्द्दिने च व्युप्त केशाय च नमः सहस्त्राक्षाय च

शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मेढुष्टमाय चेषुमते च नमो ह्रस्वाय ॥ २९ ॥

नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमोऽग्र्याय च प्रथमाय च नम ऽआशवे ॥ ३० ॥

नम ऽआशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नमः ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥ ३१ ॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्याय च नमः सोभ्याय ॥ ३२ ॥

नमः सौभ्याय च प्रतिसय्याय च नमो याम्याय च क्षेम्म्याय च नमः श्लोक्याय चावसन्न्याय च नमऽ उर्व्वय्याय च खल्याय च नमो वन्याय ॥३३॥

नमो वन्याय च कक्ष्याय नमः श्रवाय च प्रतिश्रवाय च नमऽआशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च नमो बिल्मिने ॥३४॥

नमो बिल्म्मिने च कवचिने च नमो व्वर्म्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णावे ॥३५॥

नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च ॥ ३६ ॥

नमः स्त्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय सरस्याय च नमो नादेयाय च वैशन्ताय च नमः कूप्याय ॥ ३७ ॥

नमः कूप्याय चावट्याय च नमो वीद्ध्र्याय चातप्याय च नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च नमो वात्याय ॥ ३८ ॥

नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च

नमः सोमाय च रुद्राय च नमस्ताम्म्राय चारुणाय च नमः शङ्गवे ॥३९ ॥

नमः शङ्गवे च पशुपतये च नम ऽउग्राय च भीमाय च नमो ऽग्ग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेब्भ्यो हरिकेशेभ्यो नमस्ताराय ॥४० ॥

नमः शम्भवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥४१ ॥

नमः पार्य्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्ल्याय च नमः शष्प्याय च फेन्याय च नमः

सिकत्त्याय ॥४२॥

नमः सिकत्त्याय च प्रवाह्याय च नमः किꣳशिलाय च क्षयणाय च नमः कपर्द्दिने च पुलस्तये च नमऽ इरिण्याय च प्रपत्थ्याय च नमो व्रज्याय ॥४३॥

नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्टठाय च नमः शुष्क्याय ॥४४॥

नमः शुष्क्याय च हरित्याय च नमः पाꣳसव्याय च रजस्याय च नमो लोप्याय चोल्लप्याय च नमऽ ऊर्व्याय च सूर्व्याय च नमः

पर्णाय ॥४५ ॥

नमः पर्णाय च पर्णशदाय च नमऽ उद्गुरमाणाय चाभिघ्नते च नमऽ आखिदते च प्रखिदते च नमऽ इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानाᳬं हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नमऽ आनिर्हतेभ्यः ॥४६ ॥

द्रापेऽअन्धसस्पते दरिद्र नीललोहित। आसाम्प्रजाना मेषाम्पशूनाम्माभेर्मा रोङ्मोचनः किञ्चनाममत् ॥४७ ॥

इमा रुद्राय तवसे कपर्द्दिने क्षयद्वीराय प्रभरामहेमतीः। यथा शमशद् द्विपदे चतुष्पदे विश्वम्पुष्टङ् ग्रामेऽ अस्मिन्न- नातुरम् ॥४८ ॥

या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी। शिवा रुतस्य भेषजी तया नो मृड जीवसे ॥४८॥

परि नो रुद्रस्य हेतिर्वृणक्तु परित्त्वेषस्य दुर्म्मतिर घायोः। अवस्थिरा मघवद्भयस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥५०॥

मीढुष्टम शिवतम शिवो नः सुमना भव। परमेवृक्ष ऽआयु धन्निधाय कृत्तिँ वसानऽआचर पिनाकम्बिभ्र दागहि॥५१॥

विकिरिद्द्र व्विलोहित नमस्तेऽअस्तु भगवः। यास्ते सहस्त्र ७ँ हेतयोऽन्न्यमस्म्मन्निवपन्तु ताः ॥५२॥

सहस्त्राणि सहस्त्रांशो बाह्वोस्तव हेतयः। तसामीशानो भगवः

पराचीना मुखाकृधि ॥५३॥

असङ्ख्याता सहस्राणि ये रुद्राऽ अधि भूम्याम्। तेषा ꣳ सहस्त्र योजनेऽव धन्न्वानि तन्मसि ॥५४॥

अस्म्मिन्न्महत्यर्ण्णवेऽन्तरिक्षे भवाऽअधि। तेषा ꣳ सहस्त्र योजनेऽव धन्न्वानि तन्मसि ॥५५॥

नीलग्रीवाः शितिकण्ठाः दिव ꣳ रुद्राऽउप श्रिताः। तेषा ꣳ सहस्त्र योजनेऽव धन्न्वानि तन्मसि ॥५६॥

नीलग्रीवाः शितिकण्ठाः शर्वाऽअधः क्षमाचराः। तेषा ꣳ सहस्त्र योजनेऽव धन्न्वानि तन्मसि ॥५७॥

ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः। तेषा ँ सहस्त्र

योजनेऽव धन्वानि तन्मसि ॥५८॥

ये भूतानामधिपतयो विशिखासः कपर्द्दिनः। तेषा ँ सहस्त्र

योजनेऽव धन्वानि तन्मसि ॥५९॥

ये पथां पथि रक्षय ऽऐलबृदाऽआयुर्य्युधः। तेषा ँ सहस्त्र

योजनेऽव धन्वानि तन्मसि ॥६०॥

ये तीर्त्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः। तेषा ँ सहस्त्र

योजनेऽव धन्वानि तन्मसि ॥६१॥

येन्नेषु विवद्ध्यन्ति पात्रेषु पिबतो जनान्। तेषा ँ सहस्त्र

योजनेऽव धन्वानि तन्मसि ॥६२॥

य ऽएतावन्तश्च भूरक्षे येषां वातऽइषवः। तेभ्योदश प्राचीर्दश दक्षिणा दश प्रतीची र्दशोदीचीर्दशोर्ध्वाः। तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषा ञ्जम्भे दध्मः ॥६५॥

नमोऽस्तु रुद्रेभ्यो ये पृथिव्याँ येषामन्नमिषवः। तेभ्यो दशप्राचीर्दश दक्षिणादश प्रतीचीर्दशोदी चीर्दशोर्ध्वाः। तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टितमेषा ञ्जम्भे दध्मः ॥६६॥

# अथ षष्ठोऽध्यायः

वय ꣳ ते सोमङ्गवेऽश्वाय पुरुषाय भेषजम्। सुखम्मे खायमेष्यै ॥४॥

त्र्यम्बकँ यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्॥ त्र्यम्बकँ यजामहे सुगन्धिं पतिवेदनम् । उर्वारुकमिव बन्धनादितो मुक्षीय मामुत: ॥५॥

एतत्ते रुद्रावसन्तेन परो मूजवतोतीहि। अवततधन्वा पिनाकावस: कृत्तिवासाऽअहि ꣳ सन्न: शिवोऽतीहि॥६॥

त्र्यायुषञ्जमदग्ने: कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुष

न्तन्नोऽअस्तु त्र्यायुषम् ॥७॥

शिवो नामासि स्वधितिस्ते पिता नमस्तेऽअस्तु मा मा हि ꣳ सी: । निवर्त्तयाम्यायुषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजा स्त्वाय सुवीर्य्याय ॥८॥

## अथ सप्तमोऽध्याय:

हरि ॐ उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च। सासह्वाँश्चाभियुग्वा च विक्षिप: स्वाहा ॥१॥

अग्नि ꣳ हृदयेनाशनि ꣳ हृदयाग्रेण पशुपतिङ्कृत्स्न हृदयेनभवँ यक्ना। शर्वम्मतस्नाभ्या मीशानम्मन्न्युना महादेवमन्त:

पर्शव्येनोग्रन्देवँ वनिष्ठुना वसिष्ठहनुः शिङ्गीनि कोश्याभ्याम् ॥ २ ॥

उग्रं ल्लोहितेन मित्र ᳬ सौव्रत्येन रुद्रन्दौर्व्रत्ये नेन्द्रं प्रक्रीडेन मरुतो बलेन साध्यान्प्रमुदा। भवस्य कण्ठ्य ᳬ रुद्रस्यान्तः पार्श्व्यं महादेवस्य यकृच्छर्वस्य वनिष्ठुः पशुपतेः पुरीतत् ॥ ३ ॥

(नोट- लोमभ्य से यमाय स्वाहान्तकाय.......इन चार श्लोकों का पाठ यहां शुभ नहीं माना जाता है, अतः इनकी जगह निम्न पांच ऋचायें पढ़ें - अन्य लोकाचारानुसार करें।)

---

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति

नस्ताक्ष्र्यो ऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥४॥

पयः पृथिव्यां पयऽओधीषु पयो दिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तुमह्यम् ॥५॥

विष्णोरराट मसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि। वैष्णवमसि विष्णवे त्त्वा ॥६॥

अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥७॥

द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः

शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वंꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥८ ॥

------------------------

लोमभ्यः स्वाहा लोमभ्य स्वाहा, त्वचे स्वाहा त्वचे स्वाहा, लोहिताय स्वाहा, लोहिताय स्वाहा, मेदोभ्यः स्वाहा मेदोभ्यः स्वाहा। मा ꣳ सेभ्यः स्वाहा माꣳ सेभ्यः स्वाहा, स्नावभ्यः स्वाहा स्नावभ्यः स्वाहा, अस्त्थभ्यः स्वाहा अस्त्थभ्यः स्वाहा मज्जभ्यः स्वाहा मज्जभ्यः स्वाहा। रेतसे स्वाहा पायवे स्वाहा ॥४ ॥

आयासाय स्वाहा प्रायासाय स्वाहा सँयायाय स्वाहा वियासाय

स्वाहोद्यासाय स्वाहा। शुचे स्वाहा शोचते स्वाहा शोचमानाय स्वाहा शोकाय स्वाहा ॥५ ॥

तपसे स्वाहा तप्यते स्वाहा तप्यमानाय स्वाहा तप्ताय स्वाहा धर्माय स्वाहा। निष्कृत्त्यै स्वाहा प्रायश्चित्त्यै स्वाहा भेषजाय स्वाहा ॥६ ॥

यमाय स्वाहान्तकाय स्वाहा मृत्त्यवे स्वाहा। ब्रह्मणे स्वाहा ब्रह्महत्त्यायै स्वाहा विश्वेभ्योदेवेभ्यः स्वाहा द्यावापृथिवीभ्याꣳ स्वाहा ॥७ ॥

# अथाष्टमोऽध्यायः

हरिः ओम् वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्चमे श्लोकश्चमे श्रवश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे यज्ञेन कल्पन्ताम् ॥ १ ॥

प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे । चित्तंञ्चम ऽआधीतञ्च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रञ्च मे दक्षश्च मे बलञ्च मे यज्ञेन कल्पन्ताम् ॥ २ ॥

ओजश्च मे सहश्च मऽआत्त्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थीनि च मे परूꣳषि च मे शरीराणि चम ऽआयुश्च मे जरा च मे यज्ञेन कल्पन्ताम् ॥ ३ ॥

ज्यैष्ठ्यञ्च मऽआधिपत्त्यञ्च मे मन्न्युश्च मे भामश्च मे मश्च मेम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वर्द्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥४॥

१-(नमस्ते इत्यादि ६६ मंत्रात्मको नमकाध्याय: पठनीय:)

सत्यञ्च मे, श्रद्धा च मे जगच्च मे, धनञ्च मे विश्वञ्च मे महश्च मे क्रीडा च मे मोदश्च मे जातञ्च मे जनिष्यमाणञ्च मे सूक्तञ्च मे सुकृतञ्च मे यज्ञेन कल्पन्ताम् ॥५॥

ऋतञ्च मेऽमृतञ्च मेऽयक्ष्मञ्च मे नामयच्च मेजीवातुश्च मे दीर्घायुत्त्वञ्च मेऽनमित्रञ्च मेऽभयञ्च मे सुषञ्च मे शयनञ्च मे सूषाश्च मे

सुदिनञ्च मे यज्ञेन कल्पन्ताम् ॥६ ॥

यन्ता च मे धत्ता च मे क्षेमश्च मे धृतिश्च मे विश्वञ्च मे महश्च मे सँविच्च मे ज्ञात्रञ्च मे सूश्च मे प्रसूश्चमे सीरञ्च मे लयश्च मे यज्ञेन कल्पन्ताम् ॥७ ॥

शञ्च मे मयश्च मे प्रियञ्च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भगश्च मे द्रविणञ्च मे भद्रञ्च मे श्रेयश्च मे वसीयश्च मे यशश्च मे यज्ञेन कल्पन्ताम् ॥८ ॥

२-(नमस्ते इत्यादि ६६ मंत्रात्मको नमकाध्याय: पठनीय:)

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतञ्च मे मधुञ्च मे सग्धिश्च

मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रञ्च मऽऔद्भिद्यञ्च मे यज्ञेन कल्पन्ताम् ॥९॥

रयिश्च मे रायश्च मे पुष्टञ्च मे पुष्टिश्च मे विभु च मे प्रभु च मे पूर्णञ्चमे पूर्णतरञ्च मे कुयवञ्च मेऽक्षितञ्च मेऽन्नञ्च मे क्षुच्चमे यज्ञेन कल्पन्ताम् ॥१०॥

वित्तञ्च मे वेद्यञ्च मे भूतञ्च मे भविष्यच्च मे सुगञ्च मे सुपथ्यञ्चम ऽऋद्धञ्च म ऽऋद्धिश्च मे क्लृप्तञ्च क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे यज्ञेन कल्पन्ताम् ॥११॥

व्रीह यश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मे ऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे गोधूमाश्च मे

मसूराश्च मे यज्ञेन कल्पन्ताम् ॥१२॥

३-(नमस्ते इत्यादि ६६ मंत्रात्मको नमकाध्याय: पठनीय:)

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यञ्च मेऽयश्च मे श्यामञ्च मे लोहे च मे सीसञ्च मे त्रपु च मे यज्ञेन कल्पन्ताम् ॥१३॥

अग्निश्च मऽआपश्च मे वीरुधश्चमऽओषधयश्च मे कृष्टपच्याश्च मे कृष्टपच्याश्च मे ग्राम्याश्च मे पशवऽआरण्याश्च मे वित्तञ्च मे वित्तिश्च मे भूतञ्च मे भूतिश्च मे यज्ञेन कल्पन्ताम् ॥१४॥

वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मे ऽर्थश्चम

ऽएमश्चमऽइत्त्या च मे गतिश्च मे यज्ञेन कल्पन्ताम् ॥१५॥

४-(नमस्ते इत्यादि ६६ मंत्रात्मको नमकाध्याय: पठनीय:)

अग्निश्चमऽइन्द्रश्च मे सोमश्च म ऽइन्द्रश्च मे सविता च म ऽइन्द्रश्च मे सरस्वती च मऽइन्द्रश्च पूषा च मऽइन्द्रश्च मे बृहस्पतिश्च मऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१६॥

मित्रश्चमऽइन्द्रश्च मे वरुणश्च म इन्द्रश्च मे धाता च मऽइन्द्रश्च मे त्वष्टा च मऽइन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवाऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१७॥

पृथिवी च मऽइन्द्रश्च मे ऽन्तरिक्षञ्च मऽइन्द्रश्च मे द्यौश्च म ऽइन्द्रश्च

मे सामाश्च मऽइन्द्रश्च मे नक्षत्राणि च मऽइन्द्रश्च मे दिशश्च मऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१८ ॥

५–(नमस्ते इत्यादि ६६ मंत्रात्मको नमकाध्याय: पठनीय:)

अ ꣳ शुश्च मे रश्मिश्च मेऽदाभ्यश्च मे ऽधिपतिश्च मऽउपाꣳ शुश्च मे ऽन्तर्यामश्च मऽऐन्द्र वायवश्च मे मैत्रावरुणश्च मऽआश्विनश्च मे प्रति प्रस्थानश्चमे शुक्रश्च मे मन्थी चमे यज्ञेन कल्पन्ताम् ॥१९ ॥

आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मे ऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरुत्त्वती याश्च मे निष्केवल्यश्च मे सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥२० ॥

स्त्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणाश्च मेऽधिषवणे च मे पूतभृच्च मऽआधवनीयश्च मे वेदिश्च मे बर्हिश्च मेऽवभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥ २१ ॥

६ –(नमस्ते इत्यादि ६६ मंत्रात्मको नमकाध्याय: पठनीय:)

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मेऽङ्गुलय: शक्करयो दिशश्च मे यज्ञेन कल्पन्ताम् ॥ २२ ॥

व्रतञ्च मऽऋतवश्च मे तपश्च मे सम्वत्सरश्च मे ऽहोरात्रे ऽऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पन्ताम् ॥ २३ ॥

७-(नमस्ते इत्यादि ६६ मंत्रात्मको नमकाध्याय: पठनीय:)

एकाचमे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त चमे सप्त च मे। नव च मे नवच म ऽएकादशच म ऽएकादश च मे त्रयोदश च मे त्रयोदश च मे पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च म ऽएकवि ꣳ शतिश्चमऽएकविꣳ शतिश्च मे त्रयो वि ꣳ शतिश्च मे त्रयोविꣳशतिश्च मे पञ्चवि ꣳ शतिश्च मे पञ्चविꣳ शतिश्च मे सप्तविꣳ शतिश्च मे सप्तविꣳ शतिश्च मे नववि ꣳ शतिश्च मे नववि ꣳ शतिश्च म ऽएकत्रि ꣳ शच्चम ऽएकत्रि ꣳ शच्च मे त्रयस्त्रि ꣳ शच्च मे यज्ञेन कल्पन्ताम् ॥ २४ ॥

८-(नमस्ते इत्यादि ६६ मंत्रात्मको नमकाध्याय: पठनीय:)

चतस्त्रश्च मे ऽष्टौ च मेऽष्टौ च मे द्वादश च मे द्वादश च मे षोडश च मे षोडश च मे वि ॐ शतिश्च मे विॐ शतिश्च मे चतुर्वि ॐ शतिश्च मे चतुर्वि ॐ शतिश्च मे ऽष्टावि ॐ शतिश्च मेऽष्टावि ॐ शतिश्च मे द्वात्रि ॐ शच्च मे द्वात्रि ॐ शच्च मे षट्त्रि ॐ शच्च मे षट्त्रि ॐ शच्च मे चत्त्वारि ॐ शच्च मे चत्त्वारि ॐ शच्च मे चतुश्चत्त्वारि ॐ शच्च मे चतुश्चत्त्वारि ॐ शच्च मे ऽष्टाचत्वारि ॐ शच्च मे यज्ञेन कल्पन्ताम् ॥ २५ ॥

९-(नमस्ते इत्यादि ६६ मंत्रात्मक नमकाध्याय: पठनीय:)

त्र्यविश्च मे त्र्यवी च मे दित्त्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावीच मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्योही च मे यज्ञेन कल्पन्ताम् ॥ २६ ॥

पट्ष्ठवाट्च मे पट्ष्ठौहीचम ऽउक्षाचमे वशाच म ऽऋषभश्च मे वेहच्च मे ऽनड्वाँश्च मे धेनुश्च मे यज्ञेन कल्पन्ताम् ॥ २७ ॥

१०-(नमस्ते इत्यादि ६६ मंत्रात्मक नमकाध्याय: पठनीय:)

व्वाजाय स्वाहा प्रसवाय स्वाहा पिजाय स्वाहा क्रतवे स्वाहा वसवे स्वाहा हर्पतये स्वाहाह्ने मुग्धाय स्वाहा मुग्धायवैन ᳭ शिनाय स्वाहा विन ᳭ शिनऽआन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा

भुवनस्य पतये स्वाहाऽधिपतये स्वाहा प्रजापतये स्वाहा इयन्ते राणिमत्रायययन्तासि यमनऽऊर्जे त्त्वा वृट्ष्ट्यै त्त्वा प्रजा नान्त्वाधि-पत्त्याय ॥ २८ ॥

आयुर्यज्ञेन कल्पताम् प्राणो यज्ञेन कल्पन्ताञ्चक्षुर्यज्ञेन कल्पता ँ श्रोत्रं यज्ञेन कल्पतां वाग् यज्ञेन कल्पतां मनोयज्ञेन कल्पतां आत्त्क्मा यज्ञेन कल्पतां ब्रह्मा यज्ञेन कल्पता ज्योतिर्यज्ञेन कल्पता ँ स्व यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पताँ यज्ञोयज्ञेन कल्पताम्। स्तोमश्च यजुश्च ऽऋक्च साम च बृहच्च रथन्तरञ्च स्वर्देवा ऽअगन्मामृता ऽअभूम प्रजापतेः प्रजा ऽअभूम वेट् स्वाहा ॥ २९ ॥

# अथ शान्त्याध्यायः

हरि ओम् ऋचँ वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रंप्रपद्ये वागोजः सहौजो मयि प्राणापानौ ॥ १ ॥

यन्मे छिद्रञ्चक्षुषो हृदयस्य मनसो वातितृणं बृहस्पतिर्म्मेत दधातु । शन्नो भवतु भुवनस्य यस्पतिः ॥ २ ॥

भूर्भुवः स्वः । तत्सवितुर्व्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ ३ ॥

कयानश्चित्र ऽआभुवदूती सदावृधः सखा । कयाशचिष्ठया वृता ॥ ४ ॥

कस्त्वा सत्यो मदानाम्म ꣳ हिष्ठो मत्सदन्धसः। दृढा चिदारुजे वसु ॥५॥

अभीषुणः सखीनाम वितारजरितृणाम्। शतम्भवा स्यूतिभिः ॥६॥

कयात्त्वन्न ऽऊत्त्याभि प्रमन्दसे वृषन्। कया स्तोतृभ्य ऽआभर ॥७॥

इंद्रोविश्वस्यराजति। शन्नोऽअस्तु द्विपदे। शञ्चतुष्पदे ॥८॥

शन्नो ऽमित्रः शंवरुणः शन्नो भवत्त्वर्यमा। शन्न ऽइन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः ॥९॥

शन्नो वातः पवता ॐ शन्नस्त्तपतु सूर्यः। शन्नोः कनिक्रद्देवः पर्जन्न्योऽअभि वर्षतु ॥ १० ॥

अहानि शम्भवन्तु नः श ॐ रात्रीः प्रतिधीयताम्। शन्न इन्द्राग्नि भवतामवोभिः शन्न ऽइन्द्रा वरुणा रातहव्या। शन्न ऽइन्द्रा पूषणा वाजसातौ शमिन्द्रासोमा सुविताय शँयोः ॥ ११ ॥

शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये। शँयोरभि स्त्रवन्तु नः ॥ १२ ॥

स्योना पृथिवी नो भवान्नृक्षरा निवेशनी। यच्छा नः शर्म्म सप्रथाः ॥ १३ ॥

आपो हिष्ठा मयो भुवस्त्ता न ऊर्जेदधातन। महेरणाय चक्षसे ॥१४॥

यो वः शिवतमो रसस्त्तस्य भाजय तेह नः। उशतीरिवः मातरः ॥१५॥

तस्मा अरङ्गमाम वो यस्य क्षयायजिन्वथ। आपो जनयथा च नः ॥१६॥

द्यौः शान्तिरन्तरिक्ष ॐ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वॐशान्तिः शान्तिरेवशान्तिः सामा शान्तिरेधि ॥१७॥

दृतेदृ ᳫँ ह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्। मित्रस्याहञ्चक्षुषा सर्वाणि भूतानि समीक्षे मित्रस्य चक्षुषा समीक्षामहे॥१८॥

दृतेदृ ᳫँहरे ज्योत्तेः सन्दृशि जीव्यासञ्ज्योत्तेः सन्दृशि जीव्यासम्॥१९॥

नमस्त्ते हर सेशोचिषे नमस्त्तेऽअस्त्त्वर्चिषे। अन्न्याँ स्त्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्य ᳫँ शिवोभव॥२०॥

नमस्तेऽअस्तु विद्युते नमस्ते स्तन यित्नवे। नमस्त्ते भगवन्नस्तु यतः स्वः समीहसे॥२१॥

यतो यतः समीहसे ततो नो ऽअभयङ्कुरु । शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यः ॥२२॥

सुमित्रिया नऽआप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु। योऽस्मान्द्वेष्टि यञ्चच वयंद्विष्मः ॥२३॥

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतञ्जीवेम शरदः शत ॐ श्रृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥२४॥

## अथ स्वस्ति प्रार्थना मंत्राध्याय

हरिः ओम् स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा

विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ १ ॥

ओम् पयः पृथिव्यां पयऽओधीषु पयो दिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तुमह्यम् ॥ २ ॥

ओम् विष्णोरराट मसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि। वैष्णवमसि विष्णवे त्त्वा ॥ ३ ॥

ओम् अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥ ४ ॥

ओम् सद्यो जातं प्रपद्यामि सद्यो जाताय वै नमो नमः। भवे भवेनाति भवेभवस्व मां भवोद्भवाय नमः ॥५ ॥

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः । कालाय नमः कलविकरणाय नमो बलविकरणाय नमः ॥६ ॥

बलाय नमो बलप्रमथनाय नमः सर्वभूत दमनाय नमो मनोन्मनाय नमः ॥७ ॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्व शर्वेभ्यो नमस्त्तेऽअस्तु रूद्ररूपेभ्यः ॥८ ॥

तस्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात् ॥९ ॥

ईशानः सर्व-विद्यानामीश्वरः सर्वभूतानां। ब्रह्माधिपति ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे ऽअस्तु सदा शिवोम्॥१०॥

ॐ शिवो नामासि स्वधितिस्ते पितानमस्तेऽअस्तु मामाहि ꣳसीः। निवर्त्तयाम्यायुषेन्नाद्यायप्रजनना यरायस्पोषाय सुप्रजा स्त्वाय सुवीर्याय॥११॥

ॐ विश्वानि देव सवितर्दुरितानि परासुव। यद्भद्रं तन्न आसुव॥१२॥

द्यौः शान्तिरन्तरिक्ष ꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳशान्तिः शान्तिरेवशान्तिः सामा शान्तिरेधि॥१३॥

ॐ सर्वेषां वा एष वेदानां ꣳ रसो यत्साम सर्वेषामे वैनमेतद्वेदाना ꣳ रसेनाभिषिञ्चति ॥ १४ ॥

ॐ शान्तिः शान्तिः सुशान्तिर्भवतु सर्वारिष्ट शान्तिर्भवतु। अनेन रुद्राभिषेक कर्मणा कृतेन श्री भगवान भवानीशङ्कर महारुद्र प्रीयतां न मम ॥ ॐ सदा शिवार्पणमस्तु ॥ १५ ॥

॥ इति रुद्राध्याय सम्पूर्णम् ॥

# आरती भगवान गङ्गाधर

ॐ जय गङ्गाधर जय हर जय गिरिजाधीशा। त्वं मां पालय नित्यं कृपया जगदीशा॥

हर हर हर महादेव॥१॥

कैलासे गिरिशिखरे कल्पद्रुमविपिने। गुञ्जति मधुकरपुञ्जे कुञ्जवने सुघने॥

कोकिलकूञ्जत खेलत हंसावन ललिता। रचयति कलाकलापं नृत्यति मुदसहिता॥

हर हर हर महादेव॥२॥

तस्मिन् ललितसुदेशे शाला मणिरचिता। तन्मध्ये हरनिकटे गौरी मुदसहिता॥

क्रीड़ा रचयति भूषारञ्जित निजमीशम्। इन्द्रादिक सुर सेवत नामयते शीशम्॥

हर हर हर महादेव॥३॥

विबुधवधू बहु नृत्यति हृदये मुदसहिता। किन्नर गानं कुरुते सप्त स्वर सहिता॥

धिनकत थै थै धिनकत मृदङ्गं वादयते। क्वण क्वण ललिता वेणुं मधुरं नादयते॥

हर हर हर महादेव॥४॥

रुण रुण चरणे रचयति नूपुरमुज्ज्वलिता। चक्रावर्ते भ्रमयति कुरुते तां धिक ताम्॥
तां तां लुप चुप तां तां डमरु वादयते। अङ्गुष्ठाङ्गुलिनादं लासक्तां कुरुते॥
हर हर हर महादेव॥५॥
कर्पूरद्युतिगौरं पञ्चानन सहितम्। त्रिनयनशशिधरमौलिं विषधरकण्ठयुतम्॥
सुन्दरजटाकलापं पावकयुतभालम्। डमरुत्रिशूलपिनाकं करधृतनृकपालम्॥
हर हर हर महादेव॥६॥
मुण्डै रचयति माला पन्नगमुपवीतम्। वामविभागे गिरिजारूपं अतिललितम्॥
सुन्दरसकलशरीरे कृतभस्माभरणम्। इति वृषभ ध्वजरूपं तापत्रयहरणम्॥
हर हर हर महादेव॥७॥
शङ्खनिनादं कृत्वा झल्लरि नादयते। नीराजयते ब्रह्मा वेद ऋचां पठते॥
अतिमृदुचरणसरोजं हृदि कमले धृत्वा। अवलोकयति महेशं ईशं अभिनत्वा॥
हर हर हर महादेव॥८॥
ध्यानं आरति समये हृदये अति कृत्वा। रामस्त्रिजटानाथं ईशं अभिनत्वा॥
सङ्गीतमेवं प्रतिदिन पठनं यः कुरुते। शिवसायुज्यं गच्छति भक्त्या यः शृणुते॥
हर हर हर महादेव॥९॥